षड्वि[illegible]

वैष्णववेदान्त-दर्शन-परिचयः

वाराणसेयसंस्कृतविश्वविद्यालयदर्शनपरिषदधिवेशनस्य

वैष्णवदर्शनपरिषदि

पण्डितश्रीनृसिंहाचार्यमहोदयानाम्

अध्यक्षीय-भाषणम्

दिसम्बर १९६२

षड्विध -

वैष्णव-वेदान्त-दर्शन-परिचयः

पं. श्री नृसिंहाचार्यकृतः।

वैष्णवदर्शनपरिचयः

स बिन्दुमाधवः पायाद्विभोर्यस्य निरीक्षणात् ।
अपारोऽपि हि संसारसिन्धुर्बिन्दुत्वमश्नुते ॥

श्रीशपादाम्बुजासक्तः करुणापूरशीतलः ।
मध्वाख्यो मरुदंशो मे सन्तापान् हन्तु सन्ततम् ॥

अङ्गानुषङ्गतभुजङ्गमतुङ्गभोगं गङ्गातरङ्गकृतमङ्गलमौलिभागम् ।
संगीतलोलयति पुङ्गवगीतगाथं तं गौर्यपाङ्गरसमाश्रयविश्वनाथम् ॥

आनन्दकानने विद्याक्षेत्रे वाराणसीपुरे ।
मह्यं विद्यामदुर्ये तान् सत्यध्यानगुरून् भजे ॥

माननीया दर्शनपरिषदध्यक्षाः, कुलपतिमहोदयाः, विद्वत्प्रवराः, अन्ये च सभास्ताराः !

महदिदं प्रमोदस्थानं यदद्य वाराणसेयसंस्कृतविश्वविद्यालयदर्शनपरिषदो विशिष्टाधिवेशनप्रसङ्गे वैष्णवदर्शनपरिषदायोजनाय सम्मिलिता वयमिति । यत्र वयमिदानीं सम्मिलिताः स्मः, तत्स्थानं न यादृशतादृशम् ; किन्तु पुराणप्रथितम् असीवरुणयोरन्तराले स्थितमानन्दकाननं नाम विद्याक्षेत्रम् । यत्र च "ईश्वराज्ज्ञानमन्विच्छेन्मोक्षमिच्छेज्जनार्दनात्" इति पुराणप्रसिद्धो ज्ञानप्रदाता लोकगुरुस्तारकमन्त्रोपदेशाय ज्ञानदानाय च नित्यं सन्निहितः । तदिदमानन्दरामायणगतेन—

अहं भवन्नाम गृणन् कृतार्थः वसामि काश्यामनिशं भवान्या ।
मुमूर्षमाणस्य विमुक्तयेऽहं दिशामि मन्त्रं तव रामनाम ॥

इति प्रमाणेनावगम्यते । कालश्च "मासानां मार्गशीर्षोऽहम्" इति गीताचार्येण प्रशंसितः । यस्मै कार्याय सम्मिलितास्तत्कार्यं च दर्शनपरिषद्रूपम् । येषामाध्यक्ष्ये कार्यमारब्धं ते च कुलपतिमहोदयाः । परिषदपि महाविद्वज्जनभूयिष्ठतया—

ऋग्वेदविद्यजुर्विच्च सामवेदविदेव च ।
त्र्यवरा परिषज्ज्ञेया धर्मसंशयनिर्णये ॥

विष्णुवाचकत्वम्, तथा श्रीमद्भागवतगतैः "मनुरुवाच—आत्मावास्यमिदं सर्वम्" इत्यारभ्य "शासत्त्रिविष्टपम्" इत्यन्तैः श्लोकैरीशावास्योपनिषदर्थानुवादप्रसङ्गे मनुना ईशपदस्यात्मपदेनानुवादाद् योगेन जगन्नियामकत्वविशिष्टबोधकत्वं च बोध्यम्। तथा च पङ्कजशब्दवद्योगरूढिभ्यां विष्णुविशेष्यकजगन्नियामकत्वप्रकारकज्ञानजनकत्वमात्मशब्दस्य सिद्धम्। तेन च दर्शनशब्देनैव विष्णुतत्त्वविषयकसाक्षात्कारप्रयोजकशाब्दबोधजनकशास्त्रलाभः। वैष्णवशब्देन भक्तत्वरूपसंबन्धविवक्षया विष्णुभक्ता विवक्षिताः। षष्ठ्या च परिगृहीतत्वं प्रवर्तितत्वं वा बोध्यते। तथा च विष्णुभक्तैः प्रवर्तितानामुक्तदर्शनानां परिषदिति वैष्णवदर्शनपरिषच्छब्दस्य निर्गलितोऽर्थः।

षड्विधं वैष्णवदर्शनम्

वैष्णवदर्शनानि च षट्प्रकारकाणि वर्तन्ते। तत्र प्रथमं ब्राह्मवैष्णवदर्शनम्। द्वितीयं शाम्भववैष्णवदर्शनम्। तृतीयं रामानुजवैष्णवदर्शनम्। चतुर्थं वाल्लभवैष्णवदर्शनम्। पञ्चमं निम्बार्कवैष्णवदर्शनम्। षष्ठं चैतन्यवैष्णवदर्शनम्। इतरेषां वैष्णवदर्शनानामेतेष्वेवान्तर्भावात् प्राधान्येनैतेषां षट्त्वमेव।

(1) ब्राह्मवैष्णवदर्शनम् (श्री मध्वाचार्य प्रवर्तितम्) अग्रे १२ पृष्ठे ... द्रष्टव्यम्

तत्र प्रथमं ब्राह्मवैष्णवदर्शनं तु श्रीमद्भागवते सुदर्शनास्त्राद्भीतेन दुर्वाससा प्रार्थितेन चतुर्मुखब्रह्मणा प्रतिपादितम्। तथा हि—

स्थानं मदीयं सह विश्वमेतत्क्रीडावसाने द्विपरार्धसंज्ञे।
भ्रूभङ्गमात्रेण हि सन्दिधक्षोः कालात्मनो यस्य तिरोभविष्यति॥
अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमुख्याः।
सर्वे वयं यन्नियमं प्रपन्ना मूर्ध्न्यर्पितं लोकहितं वहामः॥ इति।

(श्रीमद्भागवते ९।४।५४-५५)

अत्र हि ब्रह्मरुद्रादिसर्वदेवनियामकत्वं विष्णोरुक्तम्। तस्य च निमित्तकारणत्वम्। निमित्तकारणत्वमपि न स्थितिमात्रकारणत्वम्, किन्तु सृष्टिस्थितिसंहारत्रितयकारणत्वम्। सृष्ट्यादिकमपि तस्य लीलामात्रम्। सृष्ट्यादिकारणत्वमपि न कतिपयसृष्ट्यादिकारणत्वम्, किन्तु सर्वसृष्ट्यादिकारणत्वम्। ब्रह्मरुद्रादीनां भगवदाज्ञया भगवदनुग्रहेण च कतिपयसृष्टिसंहारकर्तृत्वम्, जीवानां तारतम्यम्, विष्णोर्ब्रह्मरुद्रादिसकलजीवोत्तमत्वम्, अत एव च सकलजीवभिन्नत्वं जगतः सत्यत्वं चोपवर्णितम्। एतेन प्रामुख्येनेमानि ब्राह्मवैष्णवदर्शनस्य

तत्त्वानीति विज्ञायते। इदं ब्राह्मवैष्णवदर्शनमेव श्रीमन्मध्वाचार्यप्रवर्तितं वैष्णवदर्शनम्। अत्र विष्णुसर्वोत्तमत्वविरोधिनोंऽशाः सर्वथा नोपलभ्यन्त इति वैष्णवदर्शनेष्वस्य मुख्यत्वम्। अत एव तदिदं विषयविवेचनानुकूल्येनान्ते प्रपञ्च्यते। (आगे पेज १२)

(2) शाम्भववैष्णवदर्शनम् (श्रीशङ्कराचार्यप्रवर्तितम्)

द्वितीयं तु "वैष्णवानां यथा शम्भुः पुराणानामिदं तथा" इति भागवतोक्त्यनुसारेण चतुर्मुखेतरविष्णुभक्तेषु श्रेष्ठत्वेन प्रशंसितस्य शम्भोर्वैष्णवदर्शनम्। तच्च विष्णुचक्रोपतापितं शरणागतं दुर्वाससं प्रति कैलासवासिना श्रीशङ्करेण प्रतिपादितम्। तथा हि—

श्रीरुद्र उवाच

वयं न तात प्रभवाम भूम्नि यस्मिन् परेऽन्येऽप्यजजीवकोशाः।
भवन्ति काले न भवन्ति हीदृशाः सहस्रशो यत्र वयं भ्रमामः॥
विदाम न वयं सर्वे यन्मायां माययावृताः।
तस्य विश्वेश्वरस्येदं शास्त्रं दुर्विषहं हि नः॥
तमेव शरणं याहि हरिस्ते शं विधास्यति।

अत्र हि (1) हरेर्विश्वेश्वरत्वमुपवर्णितम्। तथोपरितनश्लोकेषु विष्णोर्भूमशब्देन निर्देशाद्विष्णोः पूर्णसुखत्वम्, प्राणाद्यपेक्षया उत्तमत्वम्, (2) जीवानां तारतम्यम्, (3) स्वस्य विष्णुविषये सामर्थ्याभावः, (4) ब्रह्मणो जीवत्वम्, (5) अकारवाच्याद्विष्णोः सकाशादुत्पन्नत्वम्, (6) ब्रह्माण्डस्य ब्रह्मविग्रहरूपत्वम्, (7) जीवानां शरीरसंबन्ध एवोत्पत्तिः, शरीरनाश एव नाशः, (8) सृष्टिकाले ब्रह्माण्डस्योत्पत्तिः संहारकाले च तस्य नाशः, (9) ब्रह्मपदयोग्यानां रुद्रपदयोग्यानां जीवानां चानेकत्वम्, (10) रुद्रादिजीवानां पराधानमनेकशरीरग्रहणरूपं भ्रमणं चाभिहितम्। "मायया भ्रमामः" इत्यादिशब्दप्रयोगेण तच्छब्दस्य भ्रान्तिरूपान्यथाज्ञानार्थकत्वं गृहीत्वा विरुद्धार्थप्रतिपत्त्या "विमुह्येयुरिमाः प्रजाः" इति मोहोद्देश्यकत्वेनास्य ब्राह्मवैष्णवदर्शनाद्विशेषः। तदिदं शाम्भवं वैष्णवदर्शनमेव श्रीशङ्कराचार्यप्रवर्तितं वैष्णवदर्शनमिति।

श्रीशङ्कराचार्यप्रवर्तितवैष्णवदर्शनसंग्रहः

नारायणः परोऽव्यक्तादण्डमव्यक्तसंभवम्।
अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी॥

इति गीताभाष्यमङ्गलपद्ये रमाब्रह्मादिसकलचेतनोत्तमत्वं तदभिमन्यमानसकलाचेतनोत्तमत्वं

"पुरुषान्न परं किञ्चित् सा का.५

पुरुषः (नारायणः) (परः) → महालक्ष्मी (अव्यक्त...) ... सरस्व (बुद्ध्यभि...) → रुद्रः (मनोऽभिमानी) ॥

च नारायणस्य प्रतिपादितम्। तेन "इन्द्रियेभ्यः परा ह्यर्थाः" इत्यारभ्य 'पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः' इति काठकोपनिषद्युत्तमत्वतारतम्यसीमात्वेनोक्तः पुरुषो नारायण एवेति समर्थितं भवति। सीमात्वं चास्याऽपकर्षासमानाधिकरणोत्तमत्वरूपं सर्वोत्तमत्वमेव। एतेनाव्यक्तशब्दबोध्याया महालक्ष्म्या महच्छब्दवाच्यचतुर्मुखब्रह्मापेक्षयोत्तमत्वम्, तथा चतुर्मुखब्रह्मणश्च बुध्यभिमानिसरस्वत्यपेक्षयोत्तमत्वम्, सरस्वत्याश्च मनोभिमानिरुद्रापेक्षयोत्तमत्वं निरूपितं भवति। तदिदं नारायणस्य सर्वोत्तमत्वं नारायणशब्देनैव प्रकटीकृतं भवतीत्यानन्दगिरिष्टीकाकारो मनुते। तथा हि—

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः॥" इति स्मृतिसिद्धः स्थूलदृशां नारायणशब्दार्थः। सूक्ष्मदर्शिनः पुनराचक्षते—नरशब्देन चराचरात्मकं शरीरजातमुच्यते। तत्र नित्यसन्निहिताश्चिदाभासा जीवा नारा इत्युच्यन्ते। तेषामयनमाश्रयो नियामकोऽन्तर्यामी नारायण इति। यमधिकृत्यान्तर्यामिब्राह्मणं श्रीनारायणाख्यं मन्त्राम्नायं चाधीयते। तदनेन शास्त्रप्रतिपाद्यं विशिष्टं तत्त्वमादिष्टं भवति" इत्यानन्दगिरिवाक्यम्। अत्र रूढ्या नारायणशब्दवाच्ये विष्णौ योगेन सकलजडजीवनियामकत्वमभिहितम्। तेन च तस्य सर्वोत्तमत्वं सिद्ध्यति।

किञ्च, "आध्यानाय प्रयोजनाभावात्" (ब्र० सू० ३।३।१४) "आत्मशब्दाच्च" (ब्र० सू० ३।३।१५) इति ब्रह्मसूत्रभाष्ये "इन्द्रियेभ्यः परा ह्यर्थाः' 'पुरुषान्न परं किञ्चित्'·····" इत्यत्र सर्वोत्तमत्वेन प्रतिपादितः क इत्याकाङ्क्षायां "तद्विष्णोः परमं पदम्", "पुरुषान्न परं किञ्चित्" इत्युपक्रमोपसंहारयोरैकरूप्यादेकपुरुषपरत्वेनैकवाक्यत्वनिश्चये वाक्यभेदकल्पना न युक्तेत्यभिप्रायेण श्रीशङ्कराचार्यैः—"अपि च सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमित्युक्ते किं तदध्वनः पारं विष्णोः परमं पदमित्यस्यामाकाङ्क्षायामयमायास इत्यवसीयते" इति प्रतिपादनादुपक्रमवाक्योक्तो विष्णुरेवोपसंहारवाक्यस्थपुरुषशब्दवाच्य इति सोपपत्तिकमुपदर्शितम्।

अपि च, कार्यं ब्रह्म सगुणं सत्त्वरजस्तमोगुणबद्धमत एवापरं ब्रह्म। परं ब्रह्म निर्गुणं सत्त्वरजस्तमोगुणबन्धशून्यमत एव परं ब्रह्मेति सर्वसम्मतम्। तत्र कार्यं ब्रह्म हिरण्यगर्भः, परं ब्रह्म विष्णुरिति च "कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्" इत्येतत्सूत्रभाष्ये समर्थितम्। तथा हि—"कार्यब्रह्मप्रलयप्रत्युपस्थाने सति तत्रैवोत्पन्नसम्यग्दर्शनाः सन्तस्तदध्यक्षेण हिरण्यगर्भेण सहातः परं परिशुद्धं विष्णोः परमं पदं प्रतिपद्यन्ते" इति। स्मृतिरप्येतमर्थमनुजानाति—"ब्रह्मणा

सह ते सर्वे संप्राप्ते प्रतिसञ्चरे। परस्यान्ते परात्मानः प्रविशन्ति परं पदम् ॥" इत्यनेन वाक्येन विष्णोर्ब्रह्माद्युत्तमत्वं साधितं भवति।

किञ्च, आर्तिसमये क्रियमाणप्रार्थनायाः स्तोत्रस्य चाविद्यमानविषयकत्वासंभवेन स्वशरीर-दाहकालीनप्रार्थनापद्ये नरसिंहापरावतारभूतस्य श्रीहरेः प्रार्थना कृता श्रीशङ्कराचार्यैः। तत्र हि— "श्रीब्रह्मरुद्रमरुदर्ककिरीटकोटिसंघट्टिताङ्घ्रिकमलामलकान्तिकान्त। लक्ष्मीलसत्कुचसरोरुहराजहंस लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥" इत्यादीनि नरसिंहस्तोत्रभूतानि पद्यानि वर्तन्ते। तैश्च लक्ष्मीब्रह्मादिसर्वदेवोत्तमत्वं विष्णोः सिध्यति। सोऽयं श्लोकः शङ्करविजये नृसिंहस्तोत्रे वर्तते। एवमेव प्रबोधसुधाकरे—"कृपापात्रं यस्य त्रिपुररिपुरम्भोजवसतिः सुता जह्नोः पूता चरणनख-निर्णेजनजलम्। प्रदानं वा यस्य त्रिभुवनपतित्वं विभुरपि निदानं सोऽस्माकं जयति कुलदेवो यदुपतिः ॥" इति श्लोकेन ब्रह्मादीनां भगवत्कृपापात्रत्वादिकमभिधाय यदुपतेः श्रीकृष्णस्य विष्णोः स्वकुलदेवत्वं प्रतिपादितम्। अन्यत्रापि श्रीशङ्करावतारभूतैः श्रीशुकाचार्यैर्भगवच्छब्दार्थनिरूपण-प्रसङ्गे—"अथापि यत्पादनखावसृष्टं जगद्विरिञ्चोपहृतार्हणाम्भः। सेशं पुनात्यन्यतमो मुकुन्दात् को नाम लोके भगवत्पदार्थः ॥" इत्यभिहितम्। तेन हि युक्त्या मुकुन्दादन्यस्य भगवच्छब्दवाच्यत्वं प्रतिषिध्य विष्णवपरनामधेयस्य भगवतो मुकुन्दस्यैव भगवच्छब्दवाच्यत्वं समर्थितम्। तथैव भगव-च्छब्दबोध्यं समग्रैश्वर्यरूपं सर्वेश्वरत्वं ब्रह्मरुद्रयोर्विष्णुसेवकत्वेन निषिध्य ब्रह्मादिसेव्यस्य विष्णोरेव तद्युक्तमित्युक्तम्। अत एतावता प्रबन्धेन विष्णोः सर्वोत्तमत्वं सर्वेश्वरत्वं च वैष्णवदर्शनसर्वस्व-भूतमुपवर्णितम्।

भगवत्पदार्थविचारः

इतः परं मुकुन्दस्य नारायणस्य भगवच्छब्दवाच्यत्वं कथमिति विचारयामः। "आदिकर्ता नारायणाख्यो विष्णुर्देवक्यां वसुदेवादंशेन किल संबभूव'......'स च भगवान् ज्ञानैश्वर्यशक्तिबल-वीर्यतेजोभिः सदा सम्पन्नः'...'उपदिदेश'....'इति'...'परमार्थतत्त्वं च वासुदेवाख्यं परब्रह्माभिधेयभूतं विशेषतोऽभिव्यञ्जयद्गीताशास्त्रम्'....." इति च गीताभाष्ये श्रीशङ्कराचार्यैर्नारायण-विष्णु-वासुदेव-कृष्णशब्दैर्विष्णुं निर्दिश्य "स च भगवान् ज्ञानैश्वर्यबलवीर्यतेजोभिः सदा सम्पन्नः" इत्यनेन तस्यैश्वरत्वमभिहितम्। तदापीश्वरत्वं नेतरेषामिवेशितव्यत्वसमानाधिकरणम्, न वा कतिपयमात्रनिरूपितम्, किन्तु नियम्यत्वासमानाधिकरणं स्वेतरत्वव्यापकनियम्यतारूपितं च। "श्रीभगवानुवाच" (गीता ३।३७) इत्यत्र भगवच्छब्दव्याख्यानावसरे "ऐश्वर्यस्य समग्रस्य

वीर्यस्य यशसः श्रियः । वैराग्यस्याथ मोक्षस्य षण्णां भग इतीङ्गना ॥" (विष्णुपुराणे, ६।५।७४) इति विष्णुपुराणगतश्लोकमुद्धृत्य श्रीशङ्कराचार्यैः—"ऐश्वर्यादिषट्कं यस्मिन् वासुदेवे नित्यमप्रतिबद्धत्वेन सामस्त्येन च वर्तते, स वासुदेवो वाच्यो भगवानिति" इति भाष्येण विष्णोर्नियम्यत्वासमानाधिकरणं स्वेतरत्वव्यापकनियम्यतानिरूपितं चेश्वरत्वमिति सुस्पष्टं प्रतिपादितम् । इदमेवैश्वर्यस्य समग्रत्वं नामेत्यभिप्रेत्य सामस्त्येनेत्युक्तम् । तदैश्वर्यस्य केनचित्प्रतिबद्धत्वे येन प्रतिबद्धं तन्निरूपितैश्वर्यासंभवेन सामस्त्यासंभवः स्यादतः केनाऽपि तन्न प्रतिबद्धुं शक्यमिति सूचयितुमप्रतिबद्धत्वेन वर्तत इत्युक्तम् । 'नित्यं वर्तते', 'सदा सम्पन्नः' इति वाक्याभ्यां विशेषणीभूतैश्वर्यादिषट्कस्य विशेष्यभूतवासुदेवस्य च त्रैकालिकनिषेधप्रतियोगित्वरूपं परमार्थसत्त्वमभिहितम् । तदेव पुनरुपसंहारवाक्ये "परमार्थतत्त्वं च वासुदेवाख्यं परब्रह्माभिधेयभूतम्" इत्यादिना स्फुटीकृतम् । तेन ईश्वरस्य ईश्वरत्वस्य मिथ्यात्ववादः प्रतिक्षिप्तः ।

"प्रकृतिं पुरुषं चैव विद्धयनादी उभावपि" इति गीताया भाष्ये—"नित्येश्वरत्वादीश्वरस्य तत्प्रकृत्योरपि युक्तं नित्यत्वेन भवितुम्" इति वाक्येन जडजीवयोरपि त्रैकालिकनिषेधाप्रतियोगित्वमुक्तम् । तथा तत्रैव—"प्राक्प्रकृतिपुरुषयोरुत्पत्तेरीशितव्याभावादीश्वरस्यानीश्वरत्वप्रसङ्गात् । नित्यत्वे पुनरीश्वरस्य प्रकृत्योः सर्वमेतदुपपन्नम्" इत्यादिना जडजीवयोर्नित्यत्वमन्यथाऽनुपपत्त्या च समर्थितम् । तेन जडजीवेश्वराणां त्रयाणामप्यबाध्यत्वरूपं पारमार्थिकसत्यत्वं विष्णोरेवेश्वरत्वं च श्रीशङ्कराचार्याभिप्रेतमिति स्थितम् । यच्च क्वचित् षड्गुणैश्वर्यसम्पन्नस्य भगवतः श्रुतिपुराणादिषु निर्गुणत्ववचनं तत् सत्त्वरजस्तमोरूपगुणत्रयराहित्यबोधकम्, न तु निर्धर्मकत्वार्थकं निर्विशेषत्वार्थकं वा । अत एव "निर्गुणं गुणभोक्तृ च" इत्यस्य व्याख्यानावसरे निर्गुणशब्दस्य "सत्त्वरजस्तमांसि गुणाः, तैर्वर्जितमित्यर्थः" इति प्रतिपादितं तैः ।

किञ्च, निराकारत्ववचनमपि प्राकृतगुणराहित्येन प्राकृताकारराहित्यपरम्, न तु सर्वथा आकारवर्जितत्वार्थकम् । तदिदम्—"पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः । नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥" इत्यस्य भाष्ये दिव्यपदेनाप्राकृतरूपाणामप्राकृताकाराणां च सत्त्वकथनाद्युक्तमेव ।

तदिदं शाम्भववैष्णवदर्शनं श्रीशङ्कराचार्योक्तं तच्छिष्यास्तदाज्ञया प्रचारयामासुरित्यानन्दगिरिकृतशङ्करविजयतोऽवगम्यते । तत्र ह्येकदा श्रीशङ्कराचार्यैः स्वान्तरङ्गशिष्यं हस्तामलकाचार्यमाहूय मदुपदिष्टसिद्धान्तेषु कतमस्तुभ्यं रोचत इति पृष्टम् । तदा हस्तामलकाचार्यैर्वैष्णवसिद्धान्त

एव सहस्रप्रमाणसिद्धो रोचते मह्यमिति प्रतिपादितम् । तदा सम्यग्गृहीतवानसीति तान् प्रशस्य वैष्णवसिद्धान्तप्रचाराय आज्ञापयामासुः श्रीशङ्कराचार्याः । तदग्रे च तत्परम्परायां समुद्भूता अधुनातना महाशैवमर्दनशाङ्करभाष्यभावगाम्भीर्यनिर्णयाद्यनेकग्रन्थकर्तारो रामसुब्रशास्त्रिण-स्तमेतं वैष्णवसिद्धान्तं प्रचारयामासुः ।

> शास्त्राणां भेद एव श्रुतिशिखरगिरामागमानां च निष्ठा
> साकं सर्वैः प्रमाणैः स्मृतिनिकरमहाभारतादिप्रबन्धैः ।
> तत्रैव व्याससूत्राण्यकुटिलविधया भान्ति तात्पर्यवन्ति
> प्रत्नैराचार्यरत्नैरपि परिजगृहे शङ्करार्यैः स एव ॥

इति श्लोकेन रामसुब्रशास्त्रिभिर्विष्णुसर्वोत्तमत्वोपयोगितया भेदस्य श्रुत्यादितात्पर्यविषयत्वं तस्य च शङ्कराचार्याभिप्रेतत्वं च सुस्पष्टमुपवर्णितम् । प्रपञ्चितं चैतत् शाङ्करभाष्यभावगाम्भीर्य-निर्णयमहाशैवमर्दनादिग्रन्थेषु । यच्च शाङ्करग्रन्थेषु तत्र तत्राद्वैतवर्णनं दृश्यते तत् कांश्चिद् विनेयान् मोहयितुं क्रमेण वैष्णवदर्शनेऽवतारयितुं वेति तेषामाशयः । शाङ्करवैष्णवदर्शनग्रन्थेषु— "मन्मया मामुपाश्रिताः, क्षेत्रज्ञं चापि मां विद्धि" इत्यादौ जीवेश्वरयोरभेदकथनात्तस्य च विष्णुसर्वोत्तमत्वविरोधितया ब्राह्मवैष्णवदर्शनादपकृष्टत्वमस्य शाम्भव(शाङ्कर)वैष्णवदर्शनस्येति युक्तमुत्पश्यामः ।

③ रामानुजवैष्णवदर्शनम् (श्रीवैष्णवदर्शनम्)

> स्वधर्मज्ञानवैराग्यसाध्यभक्त्यैकगोचरः ।
> नारायणः परं ब्रह्म गीताशास्त्रे समीरितः ॥

इति श्रीरामानुजाचार्यगुरुभिः श्रीयामुनाचार्यैर्नारायणस्य परब्रह्मत्वं गीतादिसकल-शास्त्रप्रतिपाद्यमित्युक्तम् । एतेषां मतेऽपि भगवान् विष्णुः सर्वोत्तमः । स च श्रियः पतिः स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसंख्येयकल्याणगुणगणमहोदधिर्दिव्यरूपो वाङ्मनसापरिच्छेद्यस्वरूपस्वभावो वर्तते । विष्णुसर्वोत्तमत्ववज्जीवानामपि परस्परं भेदः पार-मार्थिको जीवजडात्मकप्रपञ्चश्च परमार्थसत्यभूत इति तेषां मतम् । किञ्च, ईश्वरश्चिदचिच्चेति पदार्थानां त्रित्वम् । तस्यात्र संक्षेपेण संग्रहः क्रियते । तथा हि—

> ईश्वरश्चिदचिच्चेति पदार्थत्रितयं हरिः ।
> ईश्वरश्चिदिति प्रोक्तो जीवा अचिदिदं जगत् ॥

वैष्णवदर्शनपरिचयः

ईश्वर-चित्-अचिदिति पदार्थत्रये हरिर्नारायण ईश्वरः, चित् जीवाः, अचिच्च जगदित्याचक्षत इति योजना। नन्वत्र पदार्थानामनन्तत्वेन त्रित्वकथनायोगः। शते पञ्चाशन्न्यायेन त्रित्वोपपत्त्यङ्गीकारे चैतन्न्यायेन त्रित्वेतरसंख्यानामप्युपपत्तेर्विशिष्य त्रित्वोक्त्ययोगः। अस्य वाक्यस्य विभागवाक्यत्वं मत्वा त्रितयमित्यस्य त्रिविधमित्यर्थकथनमपि न युक्तम्, त्रिविधशब्दस्य त्रित्वसंख्याविशिष्टविभाजकधर्मवदर्थकतया ईश्वरत्वचित्त्वाचित्त्वधर्माणां त्रित्वेऽपि तेषां विभाजकत्वासंभवात्, सामान्यधर्मव्याप्यानां परस्परासमानाधिकरणधर्माणामेव विभाजकधर्मत्वात्; त्रित्वस्येश्वरेऽपि सत्त्वेन चित्त्वेश्वरत्वयोः परस्परसमानाधिकरणत्वादिति चेदत्र ब्रूमः—कुरुपाण्डवन्यायेनात्र चिच्छब्द ईश्वरातिरिक्तचित्परः। तथा च ईश्वरत्वम्, ईश्वरभिन्नचित्त्वम्, जीवेश्वरभिन्नत्वं चेति त्रयोऽपि धर्माः परस्परासमानाधिकरणतया विभाजकधर्मा भवन्त्येव। एतदभिप्रायेणोत्तरवाक्ये हरिरीश्वरः, चिदिति प्रोक्ता जीवाः, अचिदिदं जगदिति प्रपञ्चितम्। तेन जडेश्वरयोर्जीवेश्वरयोर्जडजीवयोश्च भेदसिद्धिः। जीवा इति बहुवचनेन जीवानां मिथो भेदः, जगच्छब्दस्य सकलजडसमुदायपरतया जडानां भिथो भेदश्च सिद्ध्यतीति द्रष्टव्यम्। तथा हरेरेवेश्वरत्वोक्त्या ब्रह्मरुद्रादीनां जीवत्वमेवेति सूचितम्। एतानि हि तत्त्वानि प्रामुख्येन रामानुजदर्शनस्य भवन्ति।

किञ्च, तेषां मते चेतनाचेतनात्मकं सर्वं जगद् भगवच्छरीरम्, ईश्वरश्च शरीरीति वर्तते। "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः" इति, तथा—"य आत्मनि तिष्ठन् यस्यात्मा शरीरं य आत्मानमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः" इत्यन्तर्यामिब्राह्मणे चितां जीवानामचितां जडानां च शरीरत्वं नारायणस्य च शरीरित्वं वर्णितम्। शरीरित्वं च अन्तःस्थत्वसमानाधिकरणनियामकत्वम्, शरीरत्वं च अन्तःस्थत्वसमानाधिकरणनियामकतानिरूपितनियम्यत्वरूपं सकलवेदान्तिसम्मतम्। एतादृशशरीरशरीरिभावाभिप्रायमेव जीवेश्वरवाचकपदयोर्जडेश्वरवाचकपदयोश्च सामानाधिकरण्यम्, नाभेदाभिप्रायं न वाऽध्यारोपापवादाभिप्रायमिति।

रामानुजानां श्रीवैष्णवा इत्यपरं नाम प्रसिद्धमिति रामानुजदर्शनस्य श्रीवैष्णवदर्शनमित्येकं नाम। तस्य चोपपत्तिं केचनैवं वर्णयन्ति—"ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्" इति लक्ष्मीसूक्ते लक्ष्मीः सर्वभूतानां ब्रह्मादिस्तम्बपर्यन्तानामीश्वरीति लक्ष्म्याः सर्वजडजीवनियामकत्वं समुपवर्णितम्। तथा—"अस्येशाना जगतो विष्णुपत्नी" इति तैत्तिरीयश्रुतौ जगदीशानाया लक्ष्म्या विष्णुपत्नीत्वमभिहितम्। तथा—"यं कामये तं तमुग्रं कृणोमि" इत्यंभ्रणीसूक्ते अंभ्रण्याख्यया लक्ष्म्या

स्वस्य ब्रह्मरुद्रादिपदप्रदानसामर्थ्यमभिधाय स्वाश्रयस्य श्रीनिवासस्य समुद्रशायित्वमुपवर्णितम्। तेन ब्रह्मादिनियामक-लक्ष्मीनियामकत्वेन नारायणस्य सर्वोत्तमत्वं श्रीदेवीप्रोक्तमिति तद्दर्शनं श्रीवैष्णवदर्शनमित्याचक्षत इति वदन्ति साम्प्रदायिकाः। तथा च तस्य चायं संग्रहः—

ईश्वरश्चिदचिच्चेति पदार्थत्रितयं हरिः।
ईश्वरश्चिदिति प्रोक्ता जीवा अचिदिदं जगत्॥ इति।

एतन्मते मुक्तजीवानामीश्वरसाम्यकथनेन तदभिप्रायेण च भगवतः "नित्यनिरवद्य-निरतिशयज्ञानक्रियैश्वर्याद्यनन्तगुणापरिमितसूरिभिरनवरताभिष्टुतचरणयुगलः" इति विशेषणदानेन, तेन च निरतिशयैश्वर्यशालिनामन्येषां सत्त्वकथनेन, तस्य चोपदर्शितविष्णुनिष्ठस्वेतरत्वव्यापक-नियम्यतानिरूपितनियामकत्वरूपसमग्रैश्वर्यविरुद्धतया, "एतावतालं ननु सूचितेन गुणैरसाम्यानति-शायिनेऽस्य। हित्वेतरान् प्रार्थयतो विभूतिर्यस्याङ्घ्रिरेणुं जुषतेऽनभीप्सोः॥" इति शुकप्रदर्शित-श्रीवैष्णवदर्शनविरुद्धतया च ब्राह्मवैष्णवदर्शनादपकृष्टत्वमित्यलम्।

वाल्लभवैष्णवदर्शनम्

विशेषैः प्राकृतैः शून्यमप्राकृतविशेषवत्।
अशेषोपनिषद्वेद्यं परं ब्रह्म वयं स्तुमः॥

श्रीवल्लभाचार्याणां दर्शने श्रीकृष्णाभिधो विष्णुः सर्वोत्तमः। स च परब्रह्मस्वरूपः। यतः स लोकत्रयं गुणात्मकमाविश्यान्तर्यामिरूपो भूत्वा बिभर्तीति स पुरुषोत्तम इत्युदाहृतः। कर्तुमकर्तुमन्यथाकर्तुं समर्थत्वात्तस्य ईश्वरत्वम्। क्षराक्षरभेदेन पुरुषौ द्वौ। तौ च सर्वपदार्थ-भोक्तारावाधिभौतिकाध्यात्मरूपौ। तावेव क्षराक्षरशब्देन बोध्यैते। क्षरपुरुषस्तु भूतात्मको ब्रह्मादि-स्थावरान्तशरीररूपः। पुरुषांशरूपत्वात्तस्य पुरुषत्वम्। अक्षरस्तु पुरुषः सकलपदार्थान्तर्यामी नाशरहितो भोक्ता चेतनात्मकः। पुरुषोत्तमस्तु पूर्वोक्तक्षराक्षरेभ्योऽन्यः सर्वोत्तमः, यस्य परमा-त्मेत्यपरं नाम। स हि सर्वकारणकारणभूतो विकाररहितोऽव्ययोऽद्भुतैश्वर्य इति। तदिदं तत्त्वं वाल्लभमतीयया अमृततरङ्गिणीटीकया विज्ञायते। तथा हि—

"लोके प्रपञ्चस्थिते सर्वत्र द्वाविमावेव पुरुषौ सर्वपदार्थभोक्तारावाधिभौतिकाध्यात्म-रूपौ क्षरोऽक्षरश्च। क्षरः पुरुषः सर्वाणि भूतानि ब्रह्मादिस्थावरान्तानि शरीराणि नानाविधानि लीलौपयिकलीलात्मकत्वेनानेकरूपाणि क्षरशब्दवाच्यः पुरुषांशरूपः पुरुष इत्यर्थः। कूटः शिलासमूहः पर्वतस्तद्वत् सर्वपदार्थेषु शरीरादिषु विनश्यत्स्वपि तत्समूहस्थोऽविनाशी भोक्ता मच्चरणात्मको यः

स अक्षरपुरुष उत्तमः पुरुषः सर्वव्यतिरिक्तः परमात्मेत्युदाहृतः । परमश्चासावात्मेति परमः सर्वोत्कृष्ट आत्मा अविकृतः" इति । (गीता-अमृततरङ्गिणी, १५।१७)

एतेषां मते प्रपञ्चो भगवत्स्वरूपः । भगवांश्च मायया सर्वस्वरूपो भवति । माया हि भगवतः सर्वभवनसामर्थ्यम् । सृष्टिप्रवाहश्च तादृशमायाकरणकः । जीवब्रह्मणोरभेद एव । परं स तु सृष्टिपूर्वदशायामेव । सृष्टिदशायां तु भेदः । स च यावत्सृष्टि सत्यः । तत्त्वमसीत्यादौ प्रतीयमानोऽभेद औपचारिक एव । तदिदं तत्त्वं श्रीपुरुषोत्तमगोस्वामिविरचिते भेदाभेदस्वरूपनिर्णये व्यक्तम् । तथा हि तत्र—"यद्वा 'एकमेवाद्वितीयम्' इत्यादिश्रुतौ द्वितीयनिषेधेन प्रतिपाद्यमानमेकत्वमभेद एव पर्यवस्यति । स च सृष्टिपूर्वदशायामेव । सृष्टिदशायां तु "आत्मा वा अरे श्रोतव्यः" इत्यादौ जीवब्रह्मणोः श्रवणादिकर्तृकर्मत्वबोधनाद्भेद एव । अत एव "अधिकं तु भेदनिर्देशात्" इत्यत्र व्यासचरणैर्भेदः प्रतिपादितः । एवं जगतोऽपि भेद एव । स च यावत्सृष्टि सत्यः । यत्तावत् "तत्त्वमसि", "अयमात्मा ब्रह्म" इत्यादौ जगतो ब्रह्मत्वश्रवणम् , तत्तु "तद्गुणसारत्वात्तद्व्यपदेशः" इति सूत्रात् , "तज्जलान्" इति श्रुत्युक्तयुक्तेश्चौपचारिकम् , तस्मात् सृष्टिदशायामभेद औपचारिक एव" इति ।

वाल्लभवैष्णवदर्शनेऽस्मिन् जीवेश्वरैक्यस्य शुद्धाद्वैतस्य प्रतिपादनात् तस्य च विष्णुसर्वोत्तमत्वविरोधितया विष्णोर्नित्यैश्वर्यविरोधितया "एष नित्यो महिमा ब्राह्मणस्य" इत्यादिश्रुतिविरोधितया च ब्राह्म-शाम्भव-रामानुजवैष्णवदर्शनादपकृष्टत्वम् ।

(5) निम्बार्काचार्यप्रवर्तितवैष्णवदर्शनम्

शोभाया गुणदोषलेशरहितः स्वाभाविकैः सद्गुणैः
स्वातन्त्र्याखिलविज्ञताद्यगणितैर्युक्तोऽब्जजादिस्तुतः ।
भक्ताभीष्टप्रदो रमैकरमणो वेदैकगम्यो हि य-
स्तं वन्दे मनसा गिरा च शिरसा गोपीप्रियं श्रीहरिम् ॥

एतन्मते आत्मानात्मकभेदेन तत्त्वं द्विविधम् । प्रकृतिस्तत्कार्यदेहादिकं चानात्मद्रव्यम् । आत्मा च जीवात्मा परमात्मा चेति द्विविधः । तत्र जीवो ज्ञानस्वरूपः, ज्ञातृत्वादिधर्माधारः, सर्वदा परतन्त्रः, अणुपरिमाणः, प्रतिशरीरं भिन्नः, बन्धमोक्षयोग्यश्च । ईश्वरस्तु सर्वज्ञः सर्वशक्तिः प्रकृतिपुरुषकालकर्मादिनियन्ता अतिशयसाम्यवर्जितः परब्रह्मभूतो भगवान् वासुदेवः । तस्य सर्वसंहारकत्वात् सर्वोत्तमत्वम् , अत एव तस्य जनार्दन इति हरिरिति चान्वर्थाभिधानम् । तत्र "यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः । मृत्युर्यस्योपसेचनम्" इति श्रुतिः, "ब्रह्माणमिन्द्रं रुद्रं च यमं

वरुणमेव च। प्रसह्य हरते यस्मात्तस्माद्धरिरिहोच्यते ॥" (उ. २२७।८७) इति पद्मपुराणम्; "अत्ता चराचरग्रहणात्" इति सूत्रं च प्रमाणम्।

एतस्मिन् मते प्रायो माध्ववैष्णवदर्शनविषया माध्वग्रन्थोदाहृतप्रमाणानि च बहुलमुपलभ्यन्ते। तथापि—

श्रुतीनां सूत्राणां स्मृतिनिखिलवेदानुवचसां
परं हार्दं युक्तं ह्यखिलचिदचिद्भिन्नमपि च।
अभिन्नं स्वाभाव्याद् गुणि च परमं ब्रह्मकमिदं
समादिष्टं यैस्तानपि सततमीडे गुरुवरान् ॥

इति वदन्तः "एकत्वेन पृथक्त्वेन" इति गीताव्याख्याने सर्वाभेदेन सर्वभेदेन चेत्यर्थः, "सर्वं खल्विदं ब्रह्म", "आत्मैवेदं सर्वम्", "वासुदेवः सर्वम्" इत्यादिश्रुतिस्मृत्यभिहितसर्वचेतनाचेतनजगदात्मकत्वं परमात्मनः प्रतिपादयन्ति। इदं च सर्वेश्वरत्वसर्वोत्तमत्वयोर्विरोधीति भगवदैश्वर्यविरोध्यर्थप्रतिपादकत्वादिदमपि ब्राह्मवैष्णवदर्शनादपकृष्टमिति बोध्यम्।

पूर्वं प्रथमस्थाने चर्चितमेव विस्तरेण व्याख्यायते →

(1) माध्ववैष्णवदर्शनम्

इतः परं ब्राह्मवैष्णवदर्शनप्रतिपादनावसरे प्रतिज्ञातं माध्व(ब्राह्म)वैष्णवदर्शनं प्रपञ्चयामः।

श्रीमत्सत्यध्यानतीर्थगुरून् नत्वा तदीरितम्।
यथाशक्ति प्रवक्ष्यामि माध्ववैष्णवदर्शनम् ॥

मान्याः! श्रीमद्व्यासतीर्थश्रीमच्चरणैर्माध्वदर्शनस्य संग्रहोऽग्रिमश्लोकेन कृतः—

श्रीमन्मध्वमते हरिः परतरः सत्यं जगत्तत्त्वतो
भिन्ना जीवगणा हरेरनुचरा नीचोच्चभावं गताः।
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनं
ह्यक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः ॥ इति।

एतेन—१ हरेः सर्वोत्तमत्वम्, २ जगतः सत्यत्वम्, ३ जीवानां तात्त्विकभेदवत्त्वम्, ४ जीवानां हर्यनुचरत्वम्, ५ जीवानां तारतम्यम्, ६ स्वरूपसुखानुभवस्य मुक्तित्वम्, ७ निर्दुष्टभक्तेर्मुक्तिसाधनत्वम्, ८ प्रमाणानां त्रित्वम्, ९ हरेः सकलवेदमुख्यवेद्यत्वमिति नवसंख्याकानि तत्त्वानि प्रतिपादितानि। हरिः परतर इत्यत्र हरिरित्युद्देश्यवाचकं पदम्। तच्च रूढ्या विष्णु-

वाचकं सद् योगेन "ब्रह्माणमिन्द्रं रुद्रं च यमं वरुणमेव च। निगृह्य हरते यस्मात्तस्माद्धरिरिति स्मृतः॥" इति पद्मपुराणगतेन हरिनामनिर्वचनपरपद्यप्रदर्शितेन विष्णोर्ब्रह्मरुद्रादिसर्वसंहारकत्वप्रतिपादकम्। ततश्च हरिः परतर इत्यत्र हरिपदार्थीभूतब्रह्मादिसर्वसंहारकत्वमुद्देश्यतावच्छेदकं परतरत्वं च विधेयम्। उद्देश्यतावच्छेदकस्य विधेयप्रयोजकताया धनवान् सुखीत्यादौ दर्शनेन प्रकृते ब्रह्मादिसर्वसंहारकत्वस्य परतरत्वप्रयोजकत्वमुपदर्शितम्। प्रयोजकत्वं चात्र धूमवान् वह्निमानित्यादाविव ज्ञापकत्वं विवक्षितम्। तदिदं हरेः परतरत्वम्—

लक्ष्मीकान्त समन्ततो विकलयन्नैवेशितुस्ते समं
पश्याम्युत्तमवस्तु दूरतरतोऽपास्तं रसो योऽष्टमः।
यद्रोषोत्करदक्षनेत्रकुटिलप्रान्तोत्थिताग्निस्फुरत्
खद्योतोपमविस्फुलिङ्गभसिता ब्रह्मेशशक्रोत्कराः॥

इति पद्यात्मके नरसिंहनखस्तुतिनामके स्वग्रन्थे श्रीमन्मध्वाचार्यैर्युक्त्या प्रदर्शितम्। सोऽयं श्लोकः पूर्वप्रदर्शितब्राह्मवैष्णवदर्शनश्लोकस्य संक्षिप्तव्याख्यानरूप एवेति प्रतिभाति। तथा हि—

ब्रह्मोवाच

स्थानं मदीयं सह विश्वमेतत् क्रीडावसाने द्विपरार्धसंज्ञे।
भ्रूभङ्गमात्रेण हि सन्दिधक्षोः कालात्मनो यस्य तिरोभविष्यति॥
अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमुख्याः।
सर्वे वयं यन्नियमं प्रपन्ना मूर्ध्न्यर्पितं लोकहितं वहामः॥

यद्यप्यत्र हरेः परतरत्वं शब्दतः सुस्पष्टं न प्रतीयते, तथापि वाक्यार्थपर्यालोचनया तत्स्फुटीभवति। तद्यथा—'स्थानम्' इत्याद्यपद्ये ब्रह्मणा सर्वसंहारकत्वरूपो व्याप्यधर्मः कथितः। तत्र तथा व्याप्यधर्मबोधकस्य 'धूमोऽस्ति' इति वाक्यस्य व्याप्यो धूमः शाब्दोऽर्थः, व्यापको वह्निरार्थिकोऽर्थः, तथा 'स्थानम्' इत्यादिब्रह्मवाक्यस्य सर्वसंहारकत्वरूपो व्याप्यधर्मः शाब्दोऽर्थः, व्यापकं सर्वोत्तमत्वं चार्थिकोऽर्थः। तत्र नखस्तुतौ श्रीमन्मध्वाचार्यैः प्रतियोग्यनुपलब्धिसहकृतस्वप्रत्यक्षसिद्धं "वासुदेवात् परो ब्रह्मन्नैवान्योऽर्थोऽस्ति तत्त्वतः" (भाग० २।१४) इति ब्राह्मवैष्णवदर्शनसर्वस्वं समाभ्यधिकराहित्यरूपं सर्वोत्तमत्वं व्यापकत्वेन साध्यतया ब्रह्माभिप्रेतमिति "लक्ष्मीकान्त समन्ततो विकलयन्नैवेशितुस्ते समं पश्याम्युत्तमवस्तु दूरतरतोऽपास्तं रसो योऽष्टमः" इति प्रथमार्धेन प्रदर्शितम्। "यद्रोषोत्करदक्षनेत्रकुटिलप्रान्तोत्थिताग्निस्फुरत्खद्योतोपमविस्फुलिङ्गभसिता

ब्रह्मेशशक्रोत्कराः" इति द्वितीयार्धेन च "स्थानं मदीयम्" इत्यादिना ब्रह्मोक्तं सर्वसंहारकत्वरूपं व्याप्यं प्रदर्शितम्।

अत्र हि 'यो यत्संहारकः स तदुत्तमः' इति सामान्यव्याप्तिर्विवक्षिता। यद्यपि सा 'सन्दिधक्षोः' इति पदेन न लभ्यते, तेन हि दाहेच्छुत्वरूपं संहारेच्छुत्वमेवोक्तम्, तेन च यो यत्संहारेच्छुः स तदुत्तम इति व्याप्तिरेव लभ्यते। सा च न युज्यते, तथा सति विष्णुसंहारेच्छूनामसुराणां विष्णूत्तमत्वापातेन बहुविप्लवापातः; तथापि 'कालात्मनः' इत्यत्र कालशब्देन संहारकत्वोक्तेरुक्तसामान्यव्याप्तिलाभो भवत्येव।

नरसिंहनखस्तुतौ 'भसिताः' इति व्याप्यप्रदर्शनार्थम्। अत्र 'संहृताः' इत्यनुक्त्या 'भसिताः' इति निर्देशेन विष्णोः संहारकत्वं शरीरवियोगानुकूलव्यापारवत्त्वम्, न तु नाशकारणत्वम्; मुद्गरप्रहारादिना घटनाशके घटसंहारकत्वाप्रयोगात्, ब्रह्मादिजीवानां स्वरूपतो नित्यत्वेन नाशासंभवाच्च। शरीरवियोगोऽपि शरीरेऽविनष्टेऽपि परकायप्रवेशादिना भवन्न संहाररूपः, किन्तु शरीरनाशप्रयुक्तः शरीरसंयोगनाश एव। शरीरनाशोऽपि न यत्किञ्चिदवयवनाशरूपः, अवयवोच्छेदेऽपि जीवनदर्शनादित्यभिप्रायेण ब्रह्मोक्तसन्दिधक्षुपदसूचितं दहनकर्मत्वं न पूर्वरूपपरावृत्त्यादिमात्रम्, किन्तु भस्मीभवनरूपमेवेति सूचितम्। किञ्चात्र शस्त्रास्त्रादिजडसाहाय्येन सैन्यादिचेतनसहकारेण वेतरसंहारकत्वं न उत्तमत्वसाधकम्, नतरां सर्वोत्तमत्वसाधकम्, अत इतरानपेक्षसंहारहेतुत्वं हरेरिति ज्ञापयितुं ब्रह्मणा 'भ्रूभङ्गमात्रेण' इत्युक्तम्। तदर्थकथनं "यद्रोषोत्करदक्षनेत्रकुटिलप्रान्तोत्थिताग्निस्फुरत्खद्योतोपमविस्फुलिङ्गभसिताः" इति। अत्र ब्रह्माण्डभस्मीभावप्रयोजकखद्योतोपमविस्फुलिङ्गयुक्ताग्न्युत्थानस्थानभूतनेत्रप्रान्तकुटिलीभावप्रयोजकत्वं भ्रूभङ्गस्य सूचितम्। तेन हरेर्ब्रह्माण्डभस्मीकरणसामर्थ्यकथनं 'बुद्ध्यर्थः पादवत्' इति सूत्रोक्तदिशेतरेषां बुद्ध्यारोहणार्थमेव। वस्तुतो भगवत्सामर्थ्यमितोऽप्यनन्तगुणितमिति ज्ञापितम्।

ब्रह्मवाक्ये यत् 'कालात्मना' इत्युक्तम्, तस्य "कल संहरणे" इति धातुपाठात् कालशब्दस्य संहारार्थकत्वेन आत्मशब्दस्य च "आत्मेशब्रह्मसंभवान्" इति भागवतोक्तदिशा रूढ्या विष्णुवाचकत्वेन "कालोऽस्मि लोकक्षयकृत्प्रवृद्धः" इति भगवदुक्त्या च सर्वसंहारकस्य विष्णोरित्यर्थः। तेनात्र विष्णुवाचकपदाभावः संहारकत्वस्य स्फुटप्रतीत्यभावश्च न शङ्कनीयः। अस्मिन् आत्मशब्दस्य रूढत्वपक्षे कालश्चासावात्मा चेति कर्मधारयो मन्तव्यः।

वैष्णवदर्शनपरिचयः

किञ्चात्र आत्मशब्दस्य 'भृत्यानादत्ते इत्यात्मा' इति योगेन "ईशावास्यम्" इति मन्त्रव्याख्यानभूतमनूक्त—'आत्मावास्यम्' इत्येतद्रूपवाक्यसूचितेन स्वामीत्यर्थः। अत्र अवधिविशेषानुक्तेः सर्वेश्वरत्वरूपं स्वामित्वमेव विवक्षितम्। तथा च विष्णुः सर्वोत्तमः सर्वेश्वरत्वादित्यनुमानं सूचितम्। तदेतत् "ईशितुस्ते समं न पश्यामि" इति वाक्येन श्रीमन्मध्वाचार्यैः सूचितम्। अस्मिन् योगपक्षेऽपि कर्मधारय एव।

'कालस्यात्मा कालात्मा' इति तत्पुरुषविवक्षायां तु "कालमाये च महालक्ष्मीस्वरूपाणि" इति मन्त्रशास्त्रे कालशब्दस्य लक्ष्मीवाचकत्वादात्मशब्दस्य च पतिवाचकत्वात् कालात्मन इत्यस्य लक्ष्मीपतेरित्यर्थः। तेन विष्णुः सर्वोत्तमो लक्ष्मीपतित्वादिति युक्त्यन्तरं सूचितम्। श्रीमदाचार्यैस्तु 'लक्ष्मीकान्त' इति पदेन तत्संग्रहः कृतः। एतेन "चन्द्रां हिरण्मयीं लक्ष्मीम्" इत्युपक्रम्य प्रतिपादिते "ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्" इति वाक्ये लक्ष्म्याः सर्वेश्वरत्वकथनात् "अस्येशाना जगतो विष्णुपत्नी" इति तैत्तिरीयश्रुतौ तस्या विष्णुपत्नीत्वकथनाच्च विष्णोर्ब्रह्मादिसर्वभूतेश्वरलक्ष्मीश्वरत्वप्राप्त्या यो यदीश्वरेश्वरः स तदीश्वर इति व्याप्त्या ब्रह्मादीश्वरत्वसिद्धेर्ब्रह्माद्युत्तमत्वसिद्धिः। अत्र सर्वसंहारकत्वम्—

वासुदेवात् परो ब्रह्मन्नैवान्योऽर्थोऽस्ति तत्त्वतः।...
तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः॥
सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः।...
सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः॥
सर्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्।...
स एष भगवान् लिङ्गैस्त्रिभिरेतैरधोक्षजः॥
स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः।

(भाग० २।५।१४...)

इति नारदोपदिष्टब्राह्मदर्शनानुसारेण सर्वस्रष्टृत्व-सर्वपालकत्वयोरुपलक्षकम्। तेन च विष्णुः सर्वोत्तमः सर्वस्रष्टृत्वात्, सर्वपालकत्वात्, सर्वसंहारकत्वादिति हेतुत्रयेण सर्वेश्वरत्वसिद्ध्या सर्वोत्तमत्वसिद्धिरिति ज्ञेयम्।

एवं "प्रणवः सर्ववेदेषु" इति सर्ववेदश्रेष्ठत्वेनोक्तोङ्कारस्य "ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्" इति गीतावाक्येन "ओमित्येव सदा विप्राः पठत ध्यात केशवम्" इति हरिवंश-

गतश्रीरुद्रवचनेन च विष्णुवाचकत्वमुक्तम्। नृसिंहतापिनीयोपनिषदि च ओङ्कारघटकोकारव्याख्यानपरेण "अथैष उकार उत्कृष्टतमार्थः परे देवे नृसिंहे वर्तते" इति वचनेन परतरत्वरूपमुत्कृष्टत्वं हरेरुक्तम्। तदिदं सर्ववेदसारसंग्रहरूपेण "अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवताः" इत्यैतरेयब्राह्मणगतोपक्रमवाक्येन सुविशदमुपपादितम्। इत्थं च हरिपरतरत्वरूपप्रथमप्रमेयसिद्धिर्निराबाधा सकलप्रमाणप्रमिता चेति सिद्धम्।

स्रष्टृत्वपालकत्वसंहारकत्वानां सृष्टिपालनसंहारानुकूलप्रयत्नवत्त्वरूपाणां घटपरिणामिकारणे मृदादौ भ्रमाधिष्ठाने शुक्त्यादौ चाभावेन तत्र स्रष्टृत्वादिव्यवहाराभावेन च सृष्ट्यादिकर्तुर्हरेः सर्वनिमित्तकारणत्वमेव नोपादानकारणत्वमिति ज्ञेयम्। किञ्चात्र 'क्रीडावसाने' इति कथनेन भगवतो जगत्सर्जनादिकं क्रीडारूपमेव, न प्रयोजनार्थमिति ज्ञापितम्। तदेतत् "लोकवत्तु लीलाकैवल्यम्" इति सूत्रभाष्ये भारततात्पर्यनिर्णयादिग्रन्थेषु श्रीमदाचार्यैः प्रपञ्चितम्।

"सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः" इति ब्रह्मणः सृष्टत्वस्रष्टृत्वयोरुभयोः कथनेन सृष्टत्वाऽसमानाधिकरणस्रष्टृत्वरूपसर्वस्रष्टृत्वस्य, पाल्यत्वासमानाधिकरणपालकत्वस्य, संहार्यत्वासमानाधिकरणसंहर्तृत्वस्य च विष्णिवतरेष्वभावेनेतरेषु यथायथं कतिपयस्रष्टृत्वादिसत्त्वेऽपि सर्वस्रष्टृत्वाभावादितरप्रेरणानधीनत्वाभावाच्च न मुख्यं सर्वस्रष्टृत्वम्। विष्णोस्तु स्रष्टृत्वादीनां सृष्टत्वाद्यसमानाधिकरणत्वादितरप्रेरणानधीनत्वाच्च मुख्यमेव सर्वसृष्ट्यादिहेतुत्वम्, अतस्तस्य सर्वोत्तमत्वमिति स्थितम्।

जगतः सृज्यत्वात् पाल्यत्वात् संहार्यत्वाच्च सृष्ट्युत्तरकाले संहारपूर्वकाले च सत्त्वसिद्ध्या त्रैकालिकनिषेधप्रतियोगित्वरूपमिथ्यात्वाभावसिद्धिरिति जगत्सत्यत्वमपि ब्राह्मवैष्णवदर्शने प्रतिपादितम्। तदेतज्जगत्सत्यत्वं श्रीमदाचार्यैः "विश्वं सत्यं वशे विष्णोर्नित्यमेव प्रवाहतः", "विश्वं सत्यं मघवाना युवोः", "यच्चिकेत सत्यमित्तन्न मोघम्" इत्याद्यनेकप्रमाणोपन्यासपूर्वकं समर्थितं तत्र तत्र। तथा "नाभाव उपलब्धेः" इति सूत्रभाष्ये विश्वं मिथ्या न भवति प्रमाणदृष्टत्वादित्यादियुक्तिप्रदर्शनद्वारा च समर्थितं जगत्सत्यत्वमिति द्वितीयप्रमेयसिद्धिर्निष्प्रत्यूहा।

एवं "अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमुख्याः" इत्यत्र ब्रह्मरुद्रदक्षभृगुप्रभृतीनां प्रजेशत्व-भूतेशत्व-सुरेशत्वादिभिन्नभिन्नधर्मप्रतिपादनेन बहुवचनेन च जीवानां भेदवत्त्वम्। तस्य च "नित्यो नित्यानाम्" इति श्रुतौ नित्यानां बहूनां चेतनानां "य एको नित्यश्चेतनः कामान् विदधाति" इत्युक्त्या "इमं मानवमावर्तं नावर्तन्ते" इति श्रुत्यर्थनिर्णायकेन "अनावृत्तिः शब्दादनावृत्तिः शब्दात्" इति सूत्रेण मुक्तिदशायामपि जीवानां भेदप्रतिपादनात्, तथा "इदं ज्ञानमुपा-

श्रित्य मम साधर्म्यमागताः" इत्यादिगीतावचनाच्च जीवानां तात्त्विकभेदवत्त्वसिद्धिरिति तृतीय-प्रमेयसिद्धिर्निष्प्रत्यूहा ।

"सर्वे वयं यन्नियमं प्रपन्ना मूर्ध्न्यर्पितं लोकहितं वहामः" इति वाक्येन सूचितं जीवानां हर्यनुचरत्वरूपं प्रमेयमोङ्कारेण प्रतिपादितमिति—"अकारेणोच्यते विष्णुः श्रीरुकारेण चोच्यते । मकारेण तयोर्दासा ब्रह्माद्याः परिकीर्तिताः ॥" इति पद्मपुराणे वृद्धहारीतस्मृतौ निरूपितम् । तथा श्रीमद्भागवते—"न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः" (भाग० २।९।१०) इत्यादौ च मुक्तानामपि हर्यनुचरत्वं प्रतिपादितम् । तदनेन जीवानां हर्यनुचरत्वरूपं चतुर्थं प्रमेयं निष्कण्टकं सिद्ध्यति ।

प्रजेश-भूतेश-सुरेश इति शब्दैस्तत्रापि सुरेशमुखैरित्युक्त्या भृगुप्रधाना इत्युक्त्या च जीवानां नीचोच्चभावरूपं तारतम्यं प्रतिपादितम् । तदेतत् "अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः" इति श्रुत्या, "यावदधिकारमवस्थितिराधिकारिकाणाम्" इति सूत्रेण, "यथा यथाऽधिकारो विशिष्यते एवं मुक्तावानन्दो विशिष्यते" इत्युक्तेः, तथा "देवासुरेभ्यो मघवान् प्रधानो दक्षादयो ब्रह्मसुतास्तु तेषाम्" (भाग० ५।५।२२), "जीवाः श्रेष्ठा ह्यजीवानाम्" इत्यादि-प्रमाणाच्च जीवानां तारतम्यरूपं पञ्चमप्रमेयं सुस्थम् ।

नैजसुखानुभूतिरूपा मुक्तिरपि प्रमाणप्रमितैव । "सम्पद्याविर्भावः स्वेनशब्दात्" इति सूत्रे तद्विषयवाक्यभूते "स एष संप्रसादोऽस्माच्छरीरात् समुत्थाय स्वेन रूपेणाभिनिष्पद्यते" इति मुक्तिस्वरूपनिरूपणपरे विषयवाक्ये स्वरूपसुखानुभवो मुक्तिरिति प्रदर्शितम् । तस्यैव विवरणं "मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः" इति भागवते कृतमिति षष्ठं प्रमेयमपि सुसाधितम् ।

एवंविधा मुक्तिः केन वा साधनेन लभ्यत इति चेत् ? "भक्तिश्च तत्साधनम्" इति कथितम् । सा च भक्तिर्निरवधिकानन्तानवद्यकल्याणगुणत्वज्ञानपूर्वकः स्वात्मात्मीयसमस्तवस्तुभ्योऽनेकगुणाधिकोऽन्तरायसहस्रेणाप्यप्रतिबद्धो निरन्तरप्रेमप्रवाहः । सा च दोषरहितैव मुक्तिसाधनम् । तत्र "भक्तिरेवैनं नयति भक्तिरेवैनं दर्शयति भक्तिवशः पुरुषः भक्तिरेव भूयसी" इति माठरश्रुतिः, "अम्बुवदग्रहणात्तु न तथात्वम्" इति सूत्रम्, तथा—"महत्त्वबुद्धिर्भक्तिस्तु स्नेहपूर्वाऽभिधीयते । तयैव व्यज्यते सम्यग् जीवरूपं सुखादिकम् ॥" इति पद्मपुराणं च प्रमाणम् । तेन—"भक्त्या त्वनन्यया शक्यः अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥" इत्यादिगीतावचनैश्च निर्दुष्टभक्तेर्मुक्ति-साधनत्वं सिद्ध्यति । अतः सप्तमं प्रमेयमपि निष्कलङ्कम् ।

एतत्सर्वप्रमेयजातस्य प्रमाणाधीनसिद्धिकत्वेन प्रमाणानि कानि कानीत्याशङ्कायामुक्तम्— "अक्षादित्रितयं प्रमाणम्" इति। तथा च प्रत्यक्षमनुमानमागमश्चेति त्रीणि प्रमाणानि। इतरेषामर्थापत्त्यादीनामेतेष्वेवान्तर्भावः। "यद्वै किञ्चन मनुरब्रवीत्तद्भेषजम्" इति तैत्तिरीयश्रुत्या प्रशंसितेन मनुना—"प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्। प्रमाणमिति विज्ञेयं धर्मशुद्धिमभीप्सता॥" इति श्लोकेन प्रमाणत्रित्वस्यैव प्रतिपादनादक्षादित्रितयस्यैव प्रमाणत्वरूपाष्टमप्रमेयं दृढीभवति। ततश्च प्रमाणत्रित्वसिद्धिः।

इतः परं नवममन्तिमं प्रमेयं प्रपञ्चयामः। तथा हि—"सर्वे वेदा यत्पदमामनन्ति···" इत्युपक्रम्य "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्" इत्युपसंहारात् काठकोपनिषदनुसारेण विष्णोः सकलवेदमुख्यवेद्यत्वं सिद्ध्यति। श्रीमद्भगवद्गीतायामपि "वेदैश्च सर्वैरहमेव वेद्यः" इति प्रतिपादनात् तथा शौनकोक्ते ऋग्विधाने—"वेदाक्षराणि यावन्ति कथितानि द्विजातिभिः। तावन्ति हरिनामानि कीर्तितानि न संशयः॥" इति कथनाच्च सकलवेदमुख्यवेद्यत्वरूपं नवमं प्रमेयमपि निरवद्यमिति।

(६) श्रीकृष्णचैतन्यप्रवर्तितवैष्णवदर्शनम्

एतत्सम्प्रदायप्रधानाचार्यैः प्राचीनैः—

श्रीमन्मध्वमते हरिः परतरः सत्यं जगत्तत्त्वतो
भिन्ना जीवगणा हरेरनुचरा नीचोच्चभावं गताः।
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनं
ह्यक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः॥

इति पद्यं यथावद्व्याख्याय प्रमेयनवरत्नमालिकानाम्ना तद्व्याख्यानं प्रख्यापितम्। तथा हि—

श्रीमध्वः प्राह विष्णुं परतममखिलाम्नायवेद्यं च विश्वं
सत्यं भिन्नाश्च जीवा हरिचरणजुषस्तारतम्यं च तेषाम्।
मोक्षं हर्यङ्घ्रिलाभं तदमलभजनं तस्य हेतुं प्रमाणं
प्रत्यक्षादित्रयं चेत्युपदिशति हरिः कृष्णचैतन्यचन्द्रः॥

अनेन मध्वमतमेव मन्मतमिति स्थापयितुमेव भगवान् कृष्णश्चैतन्यरूपेण पुनरवतीर्य मध्वमतमेव प्रवर्तयामासेति निरूपितम्। आधुनिकैः पुनः कैश्चन तस्य न्यूनत्वाशङ्कया स्वतन्त्रमतप्रवर्तकत्वस्थापनाय तत्र तत्रैवपरिवर्तनमकारि। तच्चापसिद्धान्तरूपत्वादुपदर्शितदर्शनेभ्योऽपकृष्टमिति ज्ञेयम्।

वैष्णवदर्शनपरिचयः

विष्णोः सर्वोत्तमत्वम्

एतावता प्रबन्धेन सामान्यतः सर्ववैष्णवदर्शनानां संक्षेपेण विवेचनं विहितम् । इदं पुनरवशिष्यते यत्पूर्वोक्तवैष्णवदर्शनानाम् "एको रुद्रो न द्वितीयोऽवतस्थे", "हिरण्यगर्भः समवर्तताग्रे" इत्यादिवचनैर्विष्णिवतरदेवतानां सर्वोत्तमत्वस्य प्रतिपादनात्, "सर्वं खल्विदं ब्रह्म", "तत्त्वमसि" इत्यादिश्रुतिभ्यो जीवेश्वरैक्यप्रतिपादनाच्च प्रदर्शितश्रुत्यादिविरोधः स्यादिति तत्परिहारप्रकारप्रदर्शनमावश्यकमिति । तत्रेदं समाधानम्—छान्दोग्योपनिषदि सत्यकामशब्दव्याख्यानवेलायां "कामोऽस्मि भरतर्षभ" इति गीतावाक्यस्य "कामस्वामी अस्मि" इति श्रीशङ्कराचार्यैरर्थकरणात्, तथा "सर्वः शर्वः शिवः स्थाणुः" इति विष्णुसहस्रनाम्नो भाष्ये—"असतश्च सतश्चैव सर्वस्य प्रभवाप्ययात् । सर्वस्य च सदा ज्ञानात् सर्वमेनं प्रचक्षते ॥" इति भारतवचनमुदाहृत्य सर्वोत्पादकत्वात्, सर्वसंहारकत्वात्, सर्वज्ञत्वात्, सर्वस्वामित्वाच्च सर्व इति सर्वशब्दव्युत्पत्तेः प्रदर्शनात्, "सर्वं खल्विदं ब्रह्म" इत्यादौ सर्वोत्पादकं सर्वसंहारकं सर्वज्ञं सर्वस्वामि च ब्रह्मेत्यर्थलाभः । तथा—"त एव तस्यैव सर्वे रूपमभवन्" (बृह० उ०१।५।२१) इतिश्रुतौ "एतस्य प्राणस्यैव सर्वे इन्द्रियाभिमानिनो देवा रूपमभवन् अभिन्ना अभवन्नित्यनेनेन्द्रियाणां प्राणस्य चाभेदमाशङ्क्य "अयं वै नः श्रेष्ठः" इति प्राणस्येन्द्रियापेक्षया श्रेष्ठत्वावधारणात्तदविरोधेन वागादिषु परिस्पन्दलाभस्य प्राणायत्तत्वं तद्रूपभवनं वागादीनामिति मन्तव्यं न तादात्म्यम्" इति श्रीशङ्कराचार्यैर्व्याख्यातत्वात् 'तत्त्वमसि' इत्यादावपि त्वं तदायत्तस्तदधीनोऽसीत्यर्थलाभः । किञ्च, पूर्वप्रदर्शितन्यायेन सर्वशब्दानां विष्णुवाचकत्वाद् हिरण्यगर्भ-रुद्रादिपदानामपि विष्णुवाचकत्वम् । "वासुदेवो वा इदमग्र आसीन्न ब्रह्मा नेशानो नाग्नीषोमौ" इति विशिष्य रुद्रादिनिषेधकवाक्यवद्विशिष्य विष्णुनिषेधकवाक्यस्य वेदेऽनुपलम्भात् "न द्वितीयोऽवतस्थे" इत्यस्य विष्णुब्रह्मरुद्रभिन्नो नावतस्थ इति वाऽर्थलाभः ।

भक्तिरेव तत्त्वज्ञानाय प्रधानं साधनम्

मान्या विद्वांसः सभ्याश्च ! परिषदः किल मुख्यमुद्देश्यं भगवत्प्राप्तिसाधनतत्त्वज्ञानावाप्तिः । परिषदप्युक्तदिशा भगवन्माहात्म्यविदां विदुषां समवाय एव । विद्वांसो ह्येकत्र मिलिताः परस्परं स्वाज्ञातविषयान् पृच्छन्ति स्वज्ञातविषयांश्च बोधयन्ति । तेन चैतेषामन्येषां च भगवद्भक्तिरभिवर्धते । विद्वांसो हि न भवन्ति मत्सरिणो न वा दुराग्रहग्रहिला नाप्यतिमानिनः । ते च प्रीतिपूर्वकमेव परस्परं बोधयन्ति । भगवद्भक्तिरेव हि भगवत्तत्त्वज्ञानाय प्रधानं साधनम् । यथाह भगवान् गीताचार्यः—

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥
मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ इति,
भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । इति च ।

मन्ये च मया प्राचीनैरनुक्तं श्रीमद्भिरनधिगतं न किमप्यभिहितम्, तथापि केषाञ्चिद् विक्षिप्य वर्णितानां विषयाणां संग्रहः, अपरेषामुक्तानामपि विशेषेणोपपादनं क्वचित् कण्ठतोऽनुक्तानां सूचितानां स्पष्टकथनं चाकारि । अतः—

विक्षिप्तसंग्रहात् क्वापि क्वाप्युक्तस्योपपादनात् ।
अनुक्तकथनात् क्वापि सफलोऽयं श्रमो मम ॥

इत्यभियुक्तोक्त्यनुसारेण मदीयोऽयमध्यक्षकार्यभारोद्वहनप्रयासः सफलः स्यादिति ।

किञ्च, "य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति । भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।" इति भगवद्गीतोक्त्यनुसारेण भगवद्भक्तेषु भगवन्माहात्म्यवर्णनं हि भगवत्प्रीतेर्मुख्यसाधनं भाग्यलभ्यं च । श्रीमद्भिः सर्वैरेतत्कार्यसम्पादनायावसरप्रदानेन योऽयं महानुपकारः कृतस्तं न मनागपि शक्नोमि विस्मर्तुम् । अतः प्रेष्ठाः श्रीमत्सु सर्वदा कृतज्ञतामुद्वहन् परःसहस्रान् धन्यवादान् वितरामि ।

एतद्विश्वविद्यालयद्वारा क्रियमाणमिदं परिषदायोजनमतीव श्लाघ्यतरम्, इतरैरनुकरणीयं च । अनेन च तत्तद्दर्शनमर्मविदुषां विदुषामेकत्र मेलनेन तत्त्वज्ञानप्रसारो यथावत्सम्पादितो भवति भविष्यति च । अतः परिषत्कार्यसंचालकेभ्योऽधिकारिभ्यश्चेतोऽप्यधिकमुत्साहं सर्वाङ्गीणं सामर्थ्यं च प्रदाय समनुगृह्णातु गङ्गाधरो विश्वनाथो बिन्दुमाधवश्चेति प्रार्थयामि । अन्ते च 'यत्करोषि' इति भगवदुक्तिमनुस्मरन् तदेतदस्मद्गुरुहृत्कञ्जनिवासिने श्रीकृष्णाय समर्पयामि ।

जयति जगति जन्मस्थेमसंहारकर्ता
चिदचिदखिलयन्ता यः स्वतन्त्रोऽखिलज्ञः ।
विततविमलशक्तिः पूर्णबोधेष्टरूपः
श्रुतिततिमतमुक्तामुक्तभेदो रमेशः ॥

॥ इति शम् ॥

मुद्रक—बलदेवदास,
संसार प्रेस, काशीपुरा वाराणसी ।